National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 236-240
© 2025 NJHSR
www.sanskritarticle.com

**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भक्तिरसः – एका समीक्षा

**कोलुसु गोविन्दराजुलु**

**सारांशः -** प्रस्तुते शोधलेखे राष्ट्रियसंस्कृतविश्वविद्यालयस्य साहित्यविभागस्य शोधच्छात्रेण कोलुसु गोविन्दराजुलुवर्येण भक्तिरसस्य शास्त्रीयस्वरूपात्मकं विहङ्गमवलोकनं कृतम् अस्ति। मर्यादापुरुषोत्तमस्य श्रीरामस्य भक्तानां राघवसम्प्रदायानुयायिनां च अहैतुकीं भक्तिं मुख्यबिन्दुं विधायात्र साहित्यशास्त्रीयदृष्ट्या विचारः प्रवृत्तः। लेखकेन रूपगोस्वामी-मधुसूदनसरस्वती-मम्मट-विश्वनाथादीनां सिद्धान्तानुसारं प्रतिपादितं यत् भगवद्विषयिणी रतिः एव रससामग्र्या (विभाव-अनुभाव-सात्त्विक-व्यभिचारीत्यादिभिः) परिपुष्टा सती अलौकिक-भक्तिरसरूपेण परिणमते। लेखे भज्-धातोः निरुक्तिं प्रदश्य, भागवतोक्तानां प्रमाणानां साहाय्येन साधन-भाव-प्रेमभक्तीनां क्रमिकं सोपानं तथा उत्तमभक्तेः लक्षणं सोदाहरणं निरूपितम्। निष्कर्षतः, भक्तिः केवलं भावो न भूत्वा परमानन्दस्वरूपः रसराजः अस्ति।

**कूटशब्दाः –** *अखिलाण्डकोटिब्रह्माण्डनायकः, भगवद्विषयिणीरतिः, शुद्धसत्त्वविशेषात्मा, परानुरक्तिः, प्रेमसम्पत्तिः, अन्याभिलासिताशून्यम्, क्लेशघ्नी, शुभदा, मोक्षलघुताकृत्, श्रीकृष्णाकर्षणी, विषयालम्बनविभावः, आश्रयालम्बनविभावः, उद्धासुरः, सात्त्विकभावः, भावशबलता ।*

अखिलाण्डकोटिब्रह्माण्डनायकस्य दशावतारेषु अन्यतमावतारो भवति श्रीरामावतारः। अस्माकं भारतवर्षस्य सनातनसंस्कृतौ अयं श्रीरामः मर्यादापुरुषोत्तमः सर्वेषामादर्शस्वरूपस्तथा साक्षाद्धर्मस्य विग्रह इति मन्यते। अस्य नैके भक्ताः सेवकाः पूजकाः भारतभूमौ जाताः तद्गुणकीर्तनादिकं कृत्वा मुक्तिं प्राप्तवन्तश्च। यथा वैष्णवाः विष्णोः पूजां कुर्वन्ति, शैवाः शिवमुपासते, शाक्ताः शक्तिं देवीं दुर्गां ध्यायन्ति, गाणपत्याः गजाननस्य गणेशस्य स्तुतिं विदधति, सौर्याः सूर्यं स्तुवन्ति तथैव श्रीरामचन्द्रस्य सेवकाः भक्ताः राघवसम्प्रदायदायादाः श्रीरामस्तुतिं कुर्वन्ति । तेषां श्रीरामे अहैतुकी भक्तिः भवति, तमेव भगवन्तं श्रीरामं ते परमेश्वरः परमपितृत्वेन गणयन्ति। तेषु श्रीरामभक्तेषु श्रीरामभद्रः कविः अन्यतमः। तेन श्रीरामभक्तिपरकाणि यानि स्तोत्रकाव्यानि रचितानि, तत्र भक्तिवैभवं कथं वर्तते तस्मिन् विषये यथामति अत्र किञ्चिद् विचार्यते ।

**(१) काव्ये भक्तेः स्थानम्**

काव्ये प्रधानो भवति रसः । सः काव्यस्यात्मा स्वरूपाधायकं तत्त्वमित्युच्यते कावतत्त्व–कोविदैः विद्वद्भिः। “वाक्यं रसात्मकं काव्यमि”ति विश्वनाथः[1]। “वाग्वैदग्ध्यप्रधाने हि रस एवात्र जीवितमि”ति[2] अग्निपुराणवचनम्। काव्यप्रकाशकारो मम्मटोऽपि - “ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः”[3] इति गुणलक्षणनिरूपणप्रसङ्गे रसः काव्यस्य अङ्गी आत्मा इति वदति। अयं रसः सहृदयानां हृदयसंवेद्यो भवति । सामान्याः असहृदयाः अस्यास्वादनं कर्तुं न शक्नुवन्ति । तस्मादेवोच्यते – “पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्” इति । काव्ये नव रसाः प्रधानाः भवन्ति । तेषु केचन शान्तः मूलरसः, अन्ये शृङ्गारः, अपरे अद्भुतः, इतरे करुणः, केचन प्रेम इति प्रतिपादयन्ति। भक्तिरसाचार्याणां श्रीरूपगोस्वामीमधुसूदनस्वामिनां मते “रसो वै सः” इत्यादि श्रुतिस्वारस्येन भक्तिरेव मूलरसः इति स्वीक्रियते । यतो हि श्रुत्यादिप्रतिपादितः परमरसस्वरूपः परमातमा एव, अतस्तद्गता एव रत्यादयः सर्वे भावाः रसत्वं प्राप्नुवन्ति। तस्मात् परमात्मनः सम्बन्धेन भक्तिरेव मूलरसः, तेन भक्तेः सम्बन्धात् शृङ्गारादयोऽपि रसत्वमाप्नुवन्ति।

रस्यते आस्वाद्यते इति व्युत्पत्त्या रसपदेन भावः, रसाभासः, भावाभासः, भावोदयः, भावशबलता, भावसन्धिः, भावशान्तिः इत्येतेऽपि स्वीक्रियन्ते । एतेषु भावो भवति भगवद्विषयिणी रतिः। साधारणतया रतिः अलङ्कारशास्त्रे त्रिप्रकारिका निर्दिष्टा अस्ति। यदा एषा रतिः नायकनायिकयोः भवति तदा सा शृङ्गाररसस्य स्थायी भावः कथ्यते। यदा पुनः एषा रतिः तीर्यग्योनिविषयिणी भवति अर्थात् पशुपक्ष्यादिषु भवति तदा सा रसाभासद्योतिनी भवति। यदा पुनः एषा रतिः भगवद्विषयिणी भवति तदा सा भावमूला इति कथ्यते। भाव एव परवर्त्तिसाहित्ये भक्तिपदेन व्याख्यायते । भावयति चिन्तयति पदार्थानिति भावः । भावः कश्चन मानसविकारः उच्यते । साहित्यदर्पणे अस्य लक्षणमित्थमुक्तं यत् –

**सञ्चारिणः प्रधानानि देवादिविषया रतिः ।**
**उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते।।**[4]

भक्तिरसामृतसिन्धौ उच्यते –

**शुद्धसत्त्वविशेषात्मा प्रेमसूर्यांशुसाम्यभाक्।**
**रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ।।**[5]

रसानां समुत्पादकाः भावाः सदैवानन्दानुभूर्तिं भावयन्ति उत्पादयन्ति इति भावाः। भावैरेव परमानन्दप्राप्तिर्जायते। एवमलङ्कारशास्त्रे प्रतिपादितः देवादिविषयिणीरतिस्थायी भावः स च भाव एव भक्तिरिति स्थिति । अत्र देवादीत्यत्र आदिपदेन गुरुः, राजा, देशः इत्यादीनमपि ग्रहणं भवति । एतान् प्रति अनुरागः एव भावः इत्युच्यते ।

यथा मानवजीवनेन साकं सम्बद्धया क्षुधया, तस्याः क्षुधायाः परितृप्तिकारकाणां पदार्थानां सत्ता सिद्ध्यति, तथैव मनुष्यस्य चित्ते विद्यमाना उपासनामूला अनुरागमूला भावना प्रमाणयति यल्लोके कोऽप्युपास्य अवश्यमेवास्तीति। स एवोपास्यश्चराचराखिल-ब्रह्माण्डस्य कर्ता, पालयिता, संहर्ता च परमेश्वरः। तस्योपास्यस्य प्राप्त्यर्थं ज्ञानार्थं वा धार्मिकमनोवृत्तिः, दार्शनिकमनोवृत्तिश्चेति मार्गद्वयं प्रतिपादितमस्ति। तत्र धार्मिकमनोवृत्त्या उपास्यस्य ऐश्वर्यमयं माधुर्यमयञ्च स्वरूपम् अनुभूयते । दार्शनिकमनोवृत्त्या च परमात्मतत्त्वस्य जीवात्मतत्त्वस्य च पारस्परिकसम्बन्धस्य तात्त्विकं परिज्ञानं जायते। आत्मपरमात्मनोः जीवब्रह्मणोश्च पारस्परिक-तात्त्विकसम्बन्ध एव सम्पूर्णभक्तिवाङ्मयस्य निधिरस्ति ।

ज्ञानमार्गेण ब्रह्मतत्त्वचिन्तनं भवति, उपासनया तु परमप्रियत्वस्य, निकटतमसान्निध्यस्य च प्राप्तिर्जायते। प्रेमपात्रतां साधकस्तदा प्राप्नोति यदा सः भावुको भवति । भावुकत्वं भक्त्यैव लभ्यते । अत एव प्रतिपादितं यत्परमात्मा न काष्ठे, न पाषाणे, न वा मृत्तिकायामेव तिष्ठति, किन्तु स तु केवलं साधकस्य भाव एव विराजते । तस्य प्राप्त्युपायः केवलं भाव एव । तदुच्यते –

**न देवो विद्यते काष्ठे न पाषाणे न मृण्मये ।**
**देवा हि विद्यन्ते भावे तस्माद्भावो हि कारणम् ।।**[6] **इति।**

**(२) भक्तिशब्दनिरुक्तिः**

भज्-सेवायामिति धातोः क्तिन् प्रत्यते निष्पन्नोऽयं भक्तिशब्दः सेवार्थे प्रयुज्यते। भक्तिर्नामानुरागोऽपि भवति। यथोच्यते शब्दकल्पद्रुमे – **"पूज्येष्वनुरागो भक्तिरित्युपदेशः।"** ईश्वरे परानुरक्तिः भक्तिः। निरुक्तग्रन्थे देवताध्याये भक्तिरिति प्रसङ्गः उल्लिखितः। "भजनं भक्तिः" इति दुर्गाचार्यस्याभिमतम् । तत्र भजनमिति ग्रहणे वैदिकी प्रयोगः दृश्यते यथा – **"लोकादीनाम् एवाग्न्यादिभिः भजनं भक्तिः"** इति। अर्थात् सामान्यतः वैदिके भज्-धातोः त्यागार्थे भजनार्थे च भक्तिशब्दः प्रयुक्तः दृश्यते ।

भज्-विश्राणने इति धातोः अपि भक्तिरिति शब्दः त्यागार्थे क्रियते । येन सत्त्वया क्रियया पदार्थेन वा विविधदेवेभ्यः पृथक्त्वेन स्वरूपं प्रकाशते सैव भक्तिरिति निरुक्तार्थः। यथेन्द्रभक्तिः – अन्तरिक्षलोकः माध्यन्दिनं सवनम्, ग्रीष्मर्तुः, त्रिष्टुप् छन्दश्चेति इन्द्रस्याग्निदेवेभ्यः पृथक्करणस्य हेतुः। अर्थात् अनेन विविधानां देवतानां सत्त्वं त्यक्त्वा इन्द्रदेवतायाः स्वमहिमा जायते । अत्र भज्-धातोः त्यागार्थः प्रतिपादितः।

लोके भक्तिशब्दस्यार्थाः अधोलिखितप्रकारेण गृह्यन्ते । यथा –

भज्-विश्राणने (त्यागे) – विषयवासनानां त्याग एव भक्तिः ।

भज्-आमर्दने – इन्द्रियाणाम् आमर्दनमेव भक्तिः।

भज्-सेवायाम् – विषयवासनानां त्यागं कृत्वा इन्द्रियासक्तिं भङ्क्त्वा कस्यापि नवीनार्थस्य भगवतः, राज्ञः, गुरोर्वा भजनं सेवनं वा भक्तिः ।

**(३) भक्तिलक्षणम्**

श्रद्धा-विश्वास-प्रेमपरिप्लावितभक्तहृदयस्य मधुरमनोराग एव भक्तिः, यया भक्तभगवतोः, उपास्योपासकयोर्वा पारस्परिकतादात्म्य-सम्बन्धस्य निर्धारणं भवति। सा भक्तस्य विमलमानसस्य दिव्यप्रेमप्रवाहस्य भावधारा इत्युच्यते । अनयैव लौकिकविषयानन्दः स्वसमस्तकालुष्यं परिक्षाल्य अलौकिकब्रह्मानन्दं परिणामति। शाण्डिल्यसूत्रे अस्य लक्षणमुच्यते –

**अथातो भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे ।**[7] इति ।

भक्तिर्नाम परमेश्वरविषये परमप्रेम उच्यते। उपास्याकारा-कारितचित्तवृत्त्यावृत्तिरूपा परिपक्वविनिध्यासनाख्या श्रवणमन-नाभ्यासफलभूता अनुरक्तिः इति शब्दकल्पद्रुमे उच्यते। "न हीष्टदेवात् परमस्ति किञ्चि"दिति बुद्धिपूर्विका चित्तवृत्तिः एव अनुरक्तिः इति कथ्यते । सा च परमप्रीत्यधीना । विष्णुपुराणे उच्यते –

**नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।**
**तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ।।**[8]
**या प्रीतिरविवेकानां विषयेष्वनपायिनी ।**
**त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ।। इति।**

लिङ्गपुराणे उच्यते –

**भज इत्येष वै धातुः सेवायां परिकीर्तितः ।**
**तस्मात्सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी ।।**[9]

श्रीमद्भागवतमहापुराणे उच्यते –

**देवानां गुणलिङ्गानामानुश्रविककर्मणाम् ।**
**सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ।**
**अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।।**[10]

अथ प्रेमभक्तिलक्षणं नारदपञ्चरात्रे -

**अनन्यममता विष्णौ ममता प्रेमसङ्गता ।**
**भक्तिरित्युच्यते भीष्म ! प्रह्नादोद्धवनारदैः ॥**
**प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।**
**सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥**
**चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च ।**
**कियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ॥[11]**

वैष्णवानां परमानन्ददायकः सच्चिदानन्दविग्रहः विष्णुरेव प्रधानाराध्यः । तस्मिन् विष्णौ कायेन वाचा मनसा च सम्पूर्णरूपेण आत्मानं समर्प्य या अनन्यममता यत् अनन्यं प्रेम सा एव भक्तिः इति प्रह्लादोद्धवनारदादीनामभिप्रायः। सा भवति प्रेमभक्तिः। भगवत्प्रेमचिह्नानि एव भक्तहृदये दृश्यन्ते। प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्लादस्य बालानुशासने -

**निशम्य कर्माणि गुणानतुल्यान्**
**वीर्य्याणि लीलातनुभिः कृतानि ।**
**यद्वाति हर्षो पुलकाश्रुगद्गदं**
**सोत्कण्ठ उद्गायति नृत्यते च ॥**
**यदा ग्रहग्रस्त इव क्वचिद्धसत्या-**
**क्रन्दति ध्यायति बन्दते जनम् ।**
**मुहुः श्वसन् वक्ति हरे ! जगत्पते !**
**नारायणेत्यात्ममतिर्गतत्रपः ॥**
**तदा पुमान् मुक्तसमस्तबन्धन-**
**स्तद्भावभावानुकृताशयाकृतिः ।**
**निर्दग्धबीजानुशयो महीयसा**
**भक्तिप्रयोगेण समेत्यधीक्षजम् ॥[12]**

एकादशे च श्रीकवियोगेश्वरोत्तरे उच्यते -

**शृण्वन् सुभद्राणि रथाङ्गपाणे-**
**र्जन्मानि कर्म्माणि च यानि लोके ।**
**गीतानि नामानि तदर्थकानि**
**गायन् विलज्जो विचरेदसङ्गः ॥**
**एवं व्रतः स्वप्रियनामकीर्त्या**
**जातानुरागो द्रुतचित्त उच्चैः ।**
**हसत्यथो रोदिति रौति गाय-**
**त्युन्मादवन्नृत्यति लोकबाह्यः ॥[13]**

तत्रैव श्रीप्रबुद्धयोगेश्वरोत्तरे उच्यते -

**स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हारम् ।**
**भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥[14]**
**क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-**
**द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।**
**नृत्यन्ति गायन्त्यनुशीलयन्त्यजं**
**भवन्ति त॒ूष्णीं परमेत्य निर्वृताः ॥[15]**

श्रीभगवदुद्धवसंवादे च -

**कथं विना रोमहर्षं द्रवता चेतसा विना ।**
**विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥**
**वाग्गद्गदा द्रवते यस्य चित्तं**
**रोदित्यभीक्षणं हसति क्वचिच्च ।**
**विलज्ज उद्गायति नृत्यते च**
**मद्भक्तियुक्तो भुवनं पुनाति ॥[16]**

अपि च उत्तमभक्तेर्लक्षणं यथा -

**अन्याभिलासिताशून्यं ज्ञानकर्माद्यनावृतम् ।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥[17]**

श्रीभागवतस्य तृतीयस्कन्धे उच्यते -

**अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।**
**सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥**
**दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।**
**स एव भक्तियोगाख्य आन्त्यन्तिक उदाहृतः ॥[18]** इति ॥

सा उत्तमा भक्तिः षड्विधा यथा[19]-

**क्लेशघ्नी शुभदा मोक्षलघुताकृत्सुदुर्लभा ।**
**सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा॥**

तत्रास्याः क्लेशघ्नत्व यथा -

**क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा॥**

शुभदत्वं यथा -

**शुभानि प्रीणनं सर्व्वजगतामनुरक्तता ।**
**सद्गुणाः सुखमित्यादीन्याख्यातानि मनीषिभिः॥**

मोक्षलघुताकृद्यथा -

**मनागेव प्ररूढायां हृदये भगवद्रतौ।**
**पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥**

सुदुर्लभा यथा -

**साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।**
**हरिणाचाश्वदेयेति द्विधा सा स्यात् सुदुर्लभा ॥**

सान्द्रानन्दविशेषात्मा यथा -

**ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।**
**नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥**

श्रीकृष्णाकर्षणी यथा -

**कृत्वा हरिम्प्रेमभाजम्प्रियवर्गसमन्वितम् ।**
**भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा ॥**

सा उत्तमा भक्तिस्त्रिधा यथा[20] -

**सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता ॥**

साधनभक्तिर्यथा -

**कृतिसाध्या भवेत्साध्यभावा सा साधनाभिधा ।**
**नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥**

भावभक्तिर्यथा -

**शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।**
**रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥**

प्रेमभक्तिर्यथा -

**सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।**
**भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥**

**भक्तिरसस्य स्थायी भावः**

त्रैलोक्यसर्वस्वभूते परमानन्दरूपे भगवति रागादिदोषरहितानां श्रुतिस्मृतिपुराणविहितकर्म-निरतानामिन्द्रियाणां फलाभिसन्धाननिवृत्तिपूर्वकं नैरन्तर्येण या मनोवृत्तिः सैव भक्तिः इति भगवन्नामकौमुदीकारेण प्रोक्तम् ।[21] इयं मनोवृत्तिरेव भावशब्देना-भिधीयते। भक्तिनिर्धूतदोषाणां प्रसन्नोज्वलचेतसां श्रीभागवतानु-रक्तानां प्राक्तनाधुनिकसद्वासनावासितानां रसिकसङ्गवतां भक्तानां चेतसि विभावानुभावसात्त्विकसञ्चारिभिः स्वाद्यत्वं सम्प्राप्ता भगवद्विषयिणी रतिरेव भक्तिरसस्य स्थायी भावः कथ्यते। भक्तिरसायने उच्यते –

**स्थायिभावो गिराऽतोऽसौ वस्त्वाकारोऽभिधीयते ।**
**व्यक्तश्च रसतामेति परमानन्दतया पुनः ।।**[22]

भक्तिरसस्य स्थायिभावः लौकिकशृङ्गारादिरसानां स्थायिभावानां सदृशो नास्ति । यतो हि काव्ये प्रतिपादिताः लौकिकरत्यादयः स्थायिभावाः चेतसि विलीयन्ते, किन्तु भक्तिरसस्थायि- भावस्तु सदैव भक्तचेतसि तिष्ठति ।

**(५) भक्तिरसस्य विभावाः**

विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्या-दिभावा एभिः इति विभावाः। एते विभावाः द्विविधाः – आलम्बनविभावाः, उद्दीपनविभावाश्च। भक्तिरसशास्त्रानु-सारेण लोकोत्तरगुणगणनिलयः, सर्वनामलक्षणयुक्तः, निखिलरसानन्दमूर्त्तिः, परमात्मस्वरूपः श्रीकृष्णः भक्तिरसस्य विषयालम्बनं वर्तते। रूपगोस्वामिमते नायकानां शिरोमणौ श्रीकृष्णे सर्वे महागुणाः नित्यमेव विराजन्ते। स च श्रीकृष्णः स्वस्वरूपेण अन्यस्वरूपेण च द्विविधो भक्तिरसस्य विषयालम्बनं भवति । भगवद्भक्तिभावापन्नाः शुद्धान्तःकरणाः भक्ता भक्तिरसस्याश्रयालम्बन-विभावाः भवन्ति। परमसौन्दर्यनिधेः परमप्रेमास्पदस्य भक्तिरसविषयालम्बनभूतस्य श्रीकृष्णस्य गुणाः, चेष्टाः, प्रसाधनानि, वंशीध्वनिः, स्मिताङ्गसौरभम्, वचनानि, तुलसीपत्राणि, श्रीकृष्णपदा-ङ्कितानि, पुण्यारण्यानि वृन्दावनादयः, तद्वारादयः, यमुनातटादयो भक्तिरसस्योद्दीपनभावाः प्रोक्ताः सन्ति ।[24] एते उद्दीपनभावाः गुण-नाम-चरित्र-मण्डन-स्वजन-ताटस्थ्यभेदेन षड्विधाः । तत्र कायिक-मानसिक-वाचिकभेदेन गुणास्त्रिविधाः ।

**(६) भक्तिरसे अनुभावाः**

अनु पश्चाद्भवन्तीति अनुभावाः। रसानुभूतेः पश्चाद् ये भावं ज्ञापयन्ति तेऽनुभावाः। भरतमुनिमतानुसारेण ये वाचिकाङ्गिकाभिनयद्वारा रत्यादिस्थायिभावानामान्तरिकाभिव्यक्तिरूपार्थं बाह्यरूपेणानुभावयन्ति तेऽनुभावाः ।[25]

भक्तिरसज्ञानां मते चित्तस्थभावबोधकाः प्रायो बाह्यविक्रियास्वरूपाः अनुभावाः। ते च भक्तिरसज्ञैः उद्भासुरनाम्ना ख्याप्यन्ते । यथा –

**अनुभावास्तु चित्तस्थभावानवबोधकाः ।**
**ते बहिर्विक्रियाप्रायाः प्रोक्ता उद्भासुराख्यया ।।**[26]

एते अनुभावाः कायिक-मानसिक-आहार्य-वाचिक-सात्त्विकभेदेन पञ्चधा विभज्यन्ते। नृत्यम्, विलुठितम्, गीतम्, क्रोशनम्, तनुमोटनम्, हुङ्कारः, जृम्भणम्, श्वासभूमा, लोकानपेक्षिता, लालास्रवः, अट्टहासः, घूर्णम्, हिक्कादयश्च त्रयोदश अनुभावाः अत्र स्वीकृताः भक्तिरसामृत-सिन्धौ।[27]

**(७) भक्तिरसे सात्त्विकाः भावाः**

भक्तिरसशास्त्रानुसारेण साक्षात् कदाचित् किञ्चिद्व्यवधानेऽपि श्रीकृष्णस्तद्भक्तसम्बन्धिभिः भावैः अक्रान्तं चित्तं सत्त्वमित्युच्यते। यथा -

**कृष्णसम्बन्धिभिः साक्षात्किञ्चिद्वाव्यवधानतः।**
**भावैश्चित्तमाक्रान्तं सत्त्वमित्युच्यते बुधैः ।।**[28]

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी चित्तस्यान्तरिकधर्मविशेषः, येन सामाजिकहृदयेषु वासनारूपेण स्थिताः रत्यादिस्थायिभावाः समुद्दीप्यन्ते। तस्मात् सत्त्वात् समुत्पन्ना भावाः सात्त्विकाः भावाः इति कथ्यन्ते। भक्तिरसशास्त्रानुसारेण ते सर्वेऽपि सात्त्विकभावाः स्निग्ध-दिग्ध-रूक्षभेदेन त्रिविधाः। सत्त्वमयं चित्तं यदा स्वं प्राणेषु समावेशयति, तदा क्षुब्धाः प्राप्तविकाराः प्राणाः शरीरं क्षोभयन्ति, ततः प्राणैः क्षुब्धं शरीरमेव पृथिव्यादितत्त्वचतुष्टयं समाश्रित्य स्तम्भादिष्वष्टदशासु प्रादुर्भवत् सात्त्विकभावो निगद्यते । तत्र पृथिव्यां स्थिताः प्राणाः स्तम्भः, जलाश्रिता अश्रुः, तेजःस्थाः स्वेदः, वैवर्ण्यगता विर्यताश्च मूर्च्छा प्रलयो वा, स्वप्रधानाः वायुप्रधानाः प्राणाः क्रमान्मन्दमध्यतीव्रभेदात् रोमाञ्च-कम्पवैवर्णत्वं प्राप्नुवन्ति । एवं सत्त्वमयं चित्तमेव भक्तानां चेतसि तत्तत्तत्त्वं समाश्रित्य तत्तत् सात्त्विकभावरूपेण परिलक्ष्यते ।

**(८) भक्तिरसे व्यभिचारिभावाः**

विशेषेणाभिमुख्येन च स्थायिनं प्रति चरन्ति इति व्यभिचारिणः सञ्चारिणो वा भावाः। वाचिकाङ्गिकसात्त्विकरूपेण स्थायिभावस्य गतेः सञ्चलनात् सञ्चारिणोऽपि ते चलन्ति। भक्तिरसज्ञानां मते ते सञ्चारिणः स्थायिभावरूपसुधासमुद्रे तरङ्गायन्ते तद्रूपतां च प्राप्नुवन्ति। रत्यादयो निर्वेदादयो वा चित्तवृत्तिरूपभावा लौकिक-दशायां नास्वाद्यन्ते, किन्तु त एव काव्यनाट्ययोः समास्वाद्यन्ते, अत एव भावयन्ति स्वात्मानमास्वाद्यं कुर्वन्तीति भावाः स्थायिनो व्यभिचारिणः। सर्वालङ्कारिकसम्मताः त्रयस्त्रिंशद्व्यभिचारिभावाः भक्तिरसज्ञैरपि स्वीकृताः । यथा- (१) निर्वेदः (२) विषादः (३) दैन्यम् (४) ग्लानिः (५) श्रमः (६) मदः (७) गर्वः (८) शङ्का (९) त्रासः (१०) आवेगः (११) उन्मादः (१२) स्मृतिः (१३) व्याधिः (१४) मोहः (१५) धृतिः (१६) आलस्यम् (१७) जाड्यम् (१८) व्रीडा (१९) अवहित्था (२०) वितर्कः (२१) चिन्ता (२२) मतिः (२३) हर्षः (२४) औत्सुक्यम् (२५) उग्रता (२६) आमर्षः (२७) असूया (२८) चापल्यम् (२९) निद्रा (३०) स्वप्नः (३१) विबोधः (३२) अपस्मारः (३३) स्मृतिश्च ।

**उपसंहारः -** समग्रलेखस्य अनुशीलनेन इदं स्पष्टं जायते यत् भक्तिः न केवलं शुष्का उपासना वा मानसः विकारः, अपितु सर्वोत्कृष्टः अलौकिकश्च रसः अस्ति, यस्य आस्वादेन जीवात्मा परमानन्दं प्राप्नोति। भरतमुनेः नाट्यशास्त्रादारभ्य परवर्तिसाहित्यदर्पण-काव्यप्रकाशादिषु यद्यपि देवादिविषयिण्यां रतौ 'भाव'त्वमेव स्वीकृतम्, तथापि वैष्णवाचार्यैः श्रीमद्भागवतस्य, भक्तिरसामृत-सिन्धोः च आधारेण भक्तेः रसत्वं सुदृढं स्थापितम्। लेखे प्रदर्शिताः विभाव-अनुभाव-सात्त्विकादिभावाः साधकस्य चित्तं भगवदाकारं कुर्वन्ति, येन सः संसारबन्धात् मुक्तो भवति। अतः श्रीरामभद्र-दीक्षितादीनां स्तोत्रकाव्येषु दार्शनिकसिद्धान्तैः सह रसशास्त्रस्य अयं समन्वयः भक्तिरसस्य सार्वभौमत्वं महत्त्वं च संस्थापयति।

**सहायकग्रन्थाः**


- भक्तिरसामृतसिन्धुः। श्रीलश्रीमद्रूपगोस्वामिपादविरचितः, दुर्गम-सङ्गमनी-टीकासहितः, चौखम्बा संस्कृत संस्थान, वाराणसी, संस्करणम्-२००८।
- भक्तिरसायनम्। श्रीमन्मधुसूदनसरस्वतीप्रणीतम्, स्वोपज्ञटीका-सहितम्, चौखम्बा ओरियन्टालिया, वाराणसी, संस्करणम्-२००५।
- शाण्डिल्यभक्तिसूत्रम्। महर्षिशाण्डिल्यप्रणीतम्, स्वप्नेश्वरकृत-भाष्यसहितम्, भारती प्रकाशन, वाराणसी, संस्करणम्-२०१०।
- नारदपञ्चरात्रम्। महर्षिप्रणीतम्, स्वामीविज्ञानानन्दकृत-अनुवाद-सहितम्, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, संस्करणम्-२०१२।
- भगवन्नामकौमुदी। श्रीलक्ष्मणभट्टविरचितः, प्रकाशटीकासहितः, कल्याण-गोरखपुर (गीताप्रेस), पुनर्मुद्रणम्-२००३।
- श्रीमद्भागवतमहापुराणम्।(स्कन्ध-३,७,११), मूलसहितं 'सनातनी' व्याख्यासमेतम्, गीता प्रेस, गोरखपुर, संस्करणम्-२०१५।
- साहित्यदर्पणः।कविराजविश्वनाथप्रणीतः,(प्रथम-तृतीय-परिच्छेदौ), डाँ. सत्यव्रतसिंहकृत 'कुसुमप्रतिमा' व्याख्यासहितः, चौखम्बा विद्याभवन, वाराणसी, संस्करणम्-२०१४।
- काव्यप्रकाशः। मम्मटाचार्यविरचितः, (अष्टम-नवमउल्लासौ), ज्ञानमण्डल लिमिटेड, वाराणसी, संस्करणम्-२०११।
- नाट्यशास्त्रम्। भरतमुनिप्रणीतम्, (सप्तमाध्यायः), अभिनवभार-तीटीकासहितम्, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, संस्करणम्-२००९।
- विष्णुपुराणम्। नाग प्रकाशकः, जवाहरनगर, दिल्ली, संस्करणम्-२००७।
- लिङ्गपुराणम्। नाग प्रकाशकः, जवाहरनगर, दिल्ली, संस्करणम्-२००७।
- चाणक्यनीतिदर्पणः । आचार्यचाणक्यप्रणीतः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम्-२०१३।
- शब्दकल्पद्रुमः। राजा राधाकान्तदेवबहादुरविरचितम्, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, पुनर्मुद्रणम्-१९८८।


**सन्दर्भ ग्रंथाः**

[1]सा.द. – प्रथमपरिच्छेदे का.३

[2]अग्निपु. (साहित्यदर्पणे उद्धृतम् – प्रथमपरिच्छेदे)

[3]का.प्र. – ८/१

[4]सा.द. – ३/२६०

[5]भ.र.सि.

[6]चा.नी. – ८/११

[7]शा.सू. – १/१-२

[8]विष्णुपुराणवचनं वाचस्पत्ये उद्धृतम्

[9]लि.पु. – उत्तरभागः, ९/१९-२०

[10]श्रीमद्भा. – स्क.३, अ.२५, ३२-३३

[11]शब्दकल्पद्रुमे उद्धृताः श्लोकाः

[12]श्रीमद्भा. – ७/७/३४-३६

[13]तत्रैव – ११/२/३९-४०

[14]श्रीमद्भा. – ११/३/३१

[15]तत्रैव – ११/३/३२

[16]तत्रैव – ११/१४/२३-२४

[17]भ.र.सि. – १/१/११

[18]श्रीमद्भा. ३/२९/१२-१३

[19]वाचस्पत्ये उद्धृताः कारिकाः (भक्तिशब्दार्थप्रस्तावे) – पृ.4627

[20]तत्रैव – पृ.4628

[21]भगवन्नामकौमुदी प्रकाशटीका – पृ.79

[22]भ.र. – १/९

[23]भ.र.सि. – २/१/११३-११४

[24]वागङ्गाभिनेयेनेह यतस्त्वर्थोऽनुभाव्यते ।
स साङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः।। (ना.शा. – ७/३)

[25]भ.र.सि. – २/२/१

[26]भ.र.सि. २/२/१-३

[27]तत्रैव – १/३/१